# Svayambhu Stotram 2

# स्वयम्भूस्तोत्रम् २

## Document Information

Text title : Svayambhu Stotram 2

File name : svayambhUstotram2.itx

Category : vishhnu, dashAvatAra, buddha, stotra

Location : doc_vishhnu

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods,

Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

Svayambhu Stotram 2

# स्वयम्भूस्तोत्रम् २

जगत्कृते स्वयम्भुवमनादिलीनमव्ययम् ।
तनोर्विपञ्जरात्मकृत्स्वयम्भुवं नमाम्यहम् ॥ १॥

सहस्रपत्रपङ्कजं लसत्सुकर्णिकोद्भवम् ।
समस्तकामनाप्रदं स्वयम्भुवं नमाम्यहम् ॥ २॥

सहस्रभानुरञ्जनं नियुतचन्द्रनन्दनम् ।
सुरादिलोकवन्दनं स्वयम्भुवं नमाम्यहम् ॥ ३॥

त्वमेव राजसे गुणैर्भुवि स्थितो विराजसे ।
त्रिधातुक विभावसे स्वयम्भुवं नमाम्यहम् ॥ ४॥

अयं क इत्ययं हृदा मीमांसितुं न शक्तवान् ।
प्रघासमात्रमीक्षितः स्वयम्भुवं नमाम्यहम् ॥ ५॥

पठन्ति ये नरा मुदा स्वयम्भुवः स्तुतिं सदा ।
त्रिवर्गसिद्धिमाप्य ते लभन्ति मुक्तिमेव ताम् ॥ ६॥

इति श्रीबृहत्स्वयम्भूपुराणोद्धृतं शिखिनिर्मितं
स्वयम्भूस्तोत्रं सम्पूर्णम् ॥

*Svayambhu Stotram 2*
pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*